दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-239

1

जून 27 , 2025

Website- www.himsanskritam.com

Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणः आषाढ़शुक्लद्वितीया
आषाढ़ 13 प्रविष्ठांशः मङ्गलमयः भवेत्


2 हिमाचलप्रदेशे शासनविरोधे प्रदर्शनं कुर्वद्भ्यः अष्टशिक्षकेभ्यः निलम्बनानन्तरम् आरोपपत्रम्

3 प्रवर्तननिदेशालयेन निशांतसरीनस्य सप्तस्थानेषु अन्वेषणं, ४०तः अधिकाः वित्तकोशसंख्याः, त्रयः तालकयुक्तकोशाः च ग्रहीताः,

4 महाकविकालिदासदिवसः- महाकवेः कालिदासस्य साहित्येन संस्कृतं विश्वे प्रतिष्ठिता- प्रो हरेकृष्ण अगस्ती


## साइबर अपराधानां डिजिटल-निगडनानां च भ्रष्टाचारं विरुध्य सीबीआई-विभागेन पञ्च-राज्यानां द्विचत्वारिंशत-स्थानेषु अन्वेषणं कृतम्




हिमसंस्कृतवार्ताः - साइबर-अपराधानां डिजिटल-निगडनानां च भ्रष्टाचारं विरुध्य राष्ट्रव्यापी-दमनस्य कृते, सीबीआई इति केन्द्रीय-अन्वेषण-विभागेन पञ्च-राज्यानां द्विचत्वारिंशत-स्थानेषु ऑपरेशन-चक्र-5- इत्यस्य अन्तर्गतं निरीक्षणं कृतम्। प्राप्तवार्तानुसारं राजस्थान, दिल्ली, हरियाणा, उत्तराखण्ड, उत्तरप्रदेशे च इदम् अन्वेषणं सञ्जातमस्ति ।

## एयर-इण्डिया-फ्लाइट् एआई-171 इति विमानस्य ब्लैक-बॉक्स-डाटा इति संगृहीतम्




**हिमसंस्कृतवार्ताः** - एयर-इण्डिया-फ्लाइट् एआई-171 इति विमानस्य ब्लैक-बॉक्स-डाटा इति संगृहीतम्, अहमदाबादनगरे सद्य एव दुर्घटनायाः कारणभूतघटनानां क्रमेण पुनर्निर्माणं भवेत्। अग्रिम-ब्लैक-बॉक्स इत्यस्मात् क्रैश-प्रोटेक्शन-मॉड्यूल् इत्येतं सुरक्षितरूपेण निष्कासितम्, तथा च मैमोरी-मॉड्यूल इत्येतं च सफलतया अभिगत्य तस्य परीक्षणं देहल्यां एएआईबी इति विमानदुर्घटना-अन्वेषण-अभिकरणेन प्रयोगशालायां संगृहीतम्। अस्मिन् सन्दर्भे नागरिक-उड्डयन-मन्त्रालयेन उक्तं यत् दुर्घटनायाः कारणभूतघटनानां क्रमस्य पुनर्निर्माणार्थं तथा विमानसुरक्षासंवर्धनार्थं भविष्ये दुर्घटनाः निवारणाय च काकपिट्-वाइस रिकार्डर्-फ्लाइट-डेटा रिकार्डर् इत्येतयोः विश्लेषणं प्रचलति। पृष्ठभागस्य ब्लैक-बॉक्स एएआईबी-दलेन मंगलवासरे स्वस्य देहली-प्रयोगशालायाम् आनीतम्।

## नेत्रोत्सवस्य पवित्रावसरे श्री जगन्नाथस्य, भगवतः बलभद्रस्य, देवीसुभद्रायाः च नवजीवनदर्शनाय

## पुरीनगरे सहस्रं यावत् भक्ताः एकत्रिताः



हिमसंस्कृतवार्ताः - नेत्रोत्सवस्य पवित्रावसरे श्री जगन्नाथस्य, भगवान् वलभद्रस्य, देवीसुभद्रायाः च नवजीवनदर्शनाय पुरीनगरे सहस्रं यावत् भक्ताः एकत्रिताः आसन्। अस्मिन् विशिष्टदर्शने पञ्चदश-दिवसानां एकान्तवासस्य अनन्तरं देवतानां पुनरागमनं भवति । देवानां दर्शनाय भक्ताः प्रातःकालादेव सुदीर्घपंक्तौ स्थिताः आसन् । दर्शनं गहन-आध्यात्मिकभावान् उद्दीपयितुं प्रसिद्धम् अस्ति। श्रीजगन्नाथमन्दिरस्य सिंहद्वारस्य समीपे भव्यरथाः आनयिष्यन्ते। अद्य प्रातः षड्वादने रथयात्रा संस्कारः प्रारब्धः। नवदिवसीयवासाय देवताः स्वमातुलमन्दिरं गुण्डिचामन्दिरं प्रति गमिष्यन्ति। अधिकारिणः लक्षशः भक्तानां सङ्घटनस्य अपेक्षां कुर्वन्ति

## निर्वाचन-आयोगस्य नवसदस्यानां दलम् आगामि विधानसभानिर्वाचनानां सज्जतायाः समीक्षायै बिहारं सम्प्राप्तम्



**हिमसंस्कृतवार्ताः** - निर्वाचन-आयोगस्य नवसदस्यानां दलम् आगामि विधानसभानिर्वाचनानां सज्जतायाः समीक्षायै बिहारं सम्प्राप्तम्। एतत् दलं राजधानीम् पटनाम् अवाप्तम्। मुख्यनिर्वाचनाधिकारी विनोदसिंह-गुंजियालः मतदातासूचिकायाः विशेषगहनसमीक्षायै अन्यैः अधिकारिभिः सह उच्चस्तरीयोपवेशनं कृतवान्। अद्यतन सूचनार्थं सः जिलानिर्वाचनपदाधिकारिभिः विभागीयायुक्तैः अन्यवरिष्ठाधिकारिभिश्च सह मिलितवान्। आयोगेन मतदातॄणां सूचीनां सटीकतां सुनिश्चेतुं प्रतिगृहं गत्वा समीक्षार्थं घोषणा विहितम्।

## एक्सिओम-4 चालकम् इत्येतं समेत्य स्पेस-एक्स ड्रैगन अन्तरिक्षयानं अन्तर्राष्ट्रीयान्तरिक्षस्थानकेन-आईएसएस इत्यनेन सह सफलतया सम्मिलितम्



**हिमसंस्कृतवार्ताः** - भारतेन ऐतिह्यं विरचितम्। भारतीयवायुसेनादलस्य कैप्टन शुभांशु शुक्ला एक्सिओम-4 चालकम् इत्येतं समेत्य स्पेस-एक्स ड्रैगन अन्तरिक्षयानमन्तर्राष्ट्रीयान्तरिक्षस्थानकेन-आईएसएस सह सफलतया भारतीयसमयानुसारं सायं चतुर्वादने सम्मिलितम्। एतेन अभियानेन भारतं एकचत्वारिंशत् वर्षाणाम् अनन्तरं मानव-अन्तरिक्ष उड्डयनं प्रति प्रत्यागच्छति, येन श्रीशुक्ला चतुराशीत्यधिक ऊनविंशतितमे वर्षे राकेश शर्मा-इत्यस्य अनन्तरम् अन्तरिक्षे द्वितीयः भारतीयः अस्ति। आईएसएस-याने चतुर्दश दिवसीय-वैज्ञानिक-अभियाने लखनऊनगरस्य शुभांशुशुक्ला अमेरिकी-पोलैण्ड्-हङ्गरी-देशानां अन्य-त्रिभिः अन्तरिक्षयात्रिभिः सह मिलित्वा हार्मोनी-मॉड्यूल्-इत्यस्मिन् स्थापितः। अनेन अभियानेन वैश्विक-अन्तरिक्ष-प्रौद्योगिक्याः नवीनतायां भारतस्य वर्धमानं नेतृत्वं प्रकाशितम् । नासा-समर्थनेन श्रीशुक्ला इसरो तथा जैवप्रौद्योगिकीविभागेन संयुक्तरूपेण विकसितानां अग्रणीजीवनविज्ञानप्रयोगानाम् नेतृत्वं करिष्यति। चालकदलस्य अभिवादनं कुर्वन् केन्द्रीयविज्ञानप्रौद्योगिकीमन्त्री डॉ. जितेन्द्रसिंहः शुक्लायाः अन्तरिक्षे प्रवेशः राष्ट्रगौरवस्य क्षणः इति उक्तवान्।

## सुभाषितम्

**यस्तु सञ्चरते देशान्,**
**सेवते यस्तु पण्डितान्।**
**तस्य विस्तारिता बुद्धिः**
**तैलबिन्दुरिवाम्भसि॥**

अर्थात्- जो मनुष्य स्थान स्थान पर जाता है, विभिन्न देशों में घूमता है और जो मनुष्य पण्डितों के संग रहता है उनकी सेवा करता है उस मनुष्य की बुद्धि वैसे ही विस्तारित होती है जैसे जल में तेल की एक बूंद गिरते ही तेल फैलता है। इसी लिए सज्जनों और विद्वानों का संग करना चाहिए।


प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest h|msanskr|tvartah Da|ly Sanskr|t Newspaper every day, wr|te Hello on 7876636263 Watsapp


**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**


कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११


## छत्तीसगढ़े सुरक्षाबलैः सह आक्रमणे द्वे माओवादी महिले मारिते



**हिमसंस्कृतवार्ताः** - छत्तीसगढ़े सुरक्षाबलैः सह आक्रमणे द्वे माओवादी महिले मारिते। प्राप्तवार्तानुसारं नारायणपुर-जनपदस्य अबूझमाड़क्षेत्रस्य वनेषु अयं सङ्घर्षः सञ्जातः। क्षेत्रे माओवादीनां उपस्थिति विषये सूचनां प्राप्य जिला-रिजर्व रक्षकः विशेष आरक्षिदलयोः च संयुक्तदलम् सुरक्षाभियानस्य कृते प्रेषितमासीत्।

# हिमाचलप्रदेशे शासनविरोधे प्रदर्शनं कुर्वद्भ्यः अष्टशिक्षकेभ्यः निलम्बनानन्तरम् आरोपपत्रम्




**हिमसंस्कृतवार्ताः- डॉ. पद्मनाभः, शिमला।**
हिमाचलप्रदेशशासनस्य विरोधे प्रदर्शनं कृत्वा अष्टौ जेबीटी (जूनियर बेसिक ट्रेनिंग) शिक्षकाः निलम्बिताः सन्ति, तेषां विरुद्धम् आरोपपत्रं (चार्जशीट) दत्तम्। तदनन्तरं बुधवासरे शिक्षानिदेशालयेन एकं स्मारकपत्रं (मेमोरेंडम) प्रकाशितं यत्र दशदिनेभ्यः स्वपक्षप्रस्तावः लिखितरूपेण दातव्यः इति निर्दिष्टम्। यदि तेषां उत्तरं सन्तोषजनकं न भविष्यति तर्हि विभागीय- परीक्षणम् आरभ्यते।राजधानी- शिमलानगरे चौड़ा- मैदान- नामस्थले शिक्षानिदेशालयस्य पुनर्सङ्घटनस्य विरोधे जेबीटी-शिक्षक-संघेन प्रदर्शनं कृतम्। शिक्षासचिवेन पूर्वमेव प्रदर्शनं मा कुर्युः इति निर्देशः कृतः। तस्य आदेशस्य उल्लंघनेन अष्टौ शिक्षकाः निलम्बिताः। अनुज्ञां विना कृतप्रदर्शने शासनं च वरिष्ठाधिकारिणः च प्रति आपत्तिजनक-वाक्यप्रयोगः जातः इति आरोपः शिक्षकेभ्यः आरोपितः। शिक्षकेभ्यः क्रमिक- उपवेशनम् (अनशनं) शिक्षानिदेशालयस्य प्राङ्गणे एकं मासपर्यन्तं प्रचलितमासीत्। शिक्षामन्त्री रोहितठाकुरः स्वयमेव उपस्थितः भूत्वा अनशनं समाप्तं कृतवान्।
शिक्षानिदेशकः आशीष कोहलीनाम्ना प्रकाशिते स्मारकपत्रे उक्तम् यत्, हिमाचलप्रदेशशासनं केन्द्रीय-सिविल-सेवा (वर्गीकरण- नियन्त्रण- अपील) नियमावली 1965 अन्तर्गतं नियम-१८ अनुसारम् अष्टानां निलम्बितानां शिक्षकेभ्यः विरुद्धं सामान्यम् अनुशासनात्मक- कार्यविधिः आरब्धा। तेषां मुख्यालयं तेषां पूर्वनियुक्ति-स्थले निर्धारितम्। शिक्षकेभ्यः दशदिनेभ्यः स्वलिखितं प्रत्युत्तरं दातव्यं, च अपि ते व्यक्तिगतं श्रवणं इच्छन्ति इति अपि सूचयितव्यम्। परीक्षणं केवलं तेषु आरोपेषु भविष्यति, ये आरोपाः तैः अस्वीक्रियन्ते। यदि निर्देशः अनुपालितः न भवति, तर्हि परीक्षणाधिकारी एकपक्षीयं निर्णयं कर्तुं अर्हति। शिक्षानिदेशालयेन च सचेतना प्रदत्ता यत्, राजनीतिकः अथवा बाह्यप्रभावः यदि प्रयुक्तः स्यात्, तर्हि सः केन्द्रीय- सिविल-सेवा (आचरण) नियम 1964 अन्तर्गतं नियम-२० इत्यस्य उल्लङ्घनं भविष्यति, च तत्र पृथक् अनुशासनात्मक- कार्यविधिः अपि भविष्यति।

## एतेभ्यः शिक्षकेभ्यः आरोपपत्राणि

JBT शिक्षक-संघस्य प्रदेशाध्यक्षः जगदीश शर्मा, जनपद मण्डीतः रामसिंहरावः, हेमराजः, शिमलातः प्रमोदकुमारचौहानः, ऊनातः सुनीताशर्मा, काङ्गड़ातः अनिलकुमारः, संजयकुमारः, सिरमौरतः प्रतापठाकुरः च। इदानीं शिक्षकसंघस्य अध्यक्षः जगदीशशर्मा उक्तवान् यत् पूर्वं शिक्षामन्त्रिणा रोहितठाकुरस्य अध्यक्षतायां या वार्तासभा आयोजिता, तस्यां ये निर्णयाः जाताः, तेषां अनुपालनार्थं लिखितनिर्देशाः प्रकाशितव्याः। तस्मिन् निर्णये एव उक्तं यत् निलम्बन- आदेशाः प्रत्याहर्तव्या इति, किन्तु अद्यापि तद् न जातम्।

## "लौकिकन्यायकोशः"
## "दशमविवेकन्यायः"



दश मन्दमतयः एकदा एकं ग्रामं प्रति प्रस्थिताः। मार्गे एकः सर्वेषां गणना कर्तुम् उद्युक्तः जातः। सः अन्येषां गणनां कृत्वा आत्मान् अगणयित्वा च वयं नव एव आगताः एकः कुत्रचित् भ्रष्टः इति आक्रोशं कृतवान्। तत् श्रुत्वा एकैकशः ते सर्वे अपि गणनां तथैव कृत्वा नवसंख्याम् एव प्राप्य दुःखेन आक्रोशम् आरब्धवन्तः। तदा एकः पथिकः तत्र आगत्य समस्यां च ज्ञात्वा तेषां गणनां कृतवान्। सः तावत् दशसंख्यां च प्राप्तवान्। एकेन यदा पृष्टं सा कथं प्राप्ता इति तदा तेन भणितं 'त्वम् अन्ते आत्मानम् अपि गणय' इति। एवं खलु जगति अविवेकी आत्मान्वेषणे रतः सर्वत्र अन्विषति 'अहम्' इति भासमानम् आन्तरम् आत्मानं न गणयति। योग्यस्य आचार्यस्य उपदेशेन च सः आत्मानः यथार्थ रूपं जानातीति अस्य भावः।
पश्यन्तु- पञ्चदशीतृप्तिदीपप्रकरणे २३-२८।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**

# हिमाचलप्रदेशे पूर्वप्राथमिक- शिक्षक- नियुक्त्यर्थं द्वयोः चरणयोः प्रमाणपत्रपरीक्षणम्



**हिमसंस्कृतवार्ताः- डॉ. पद्मनाभः, शिमला।**
हिमाचलप्रदेशे पूर्वप्राथमिक- शिक्षकनियुक्तेः अन्तर्गतं द्वयोः चरणयोः माध्यमेन अभ्यर्थीनां प्रमाणपत्राणां परीक्षणं भविष्यति। प्रथमचरणे साक्षात्कारं कुर्वन्ती संस्था उपाधि-सहितान् अन्यान् प्रमाणपत्रान् परीक्षेत्। द्वितीयचरणे शिक्षाविभागः स्वस्तरेण सर्वेषां प्रमाणपत्राणां तथा अन्यशैक्षिकप्रमाणपत्राणां च परीक्षणं करिष्यति। साक्षात्कारकाले केचन अभ्यर्थिनः कृत्रिमप्रमाणपत्राणि च अमान्यसंस्थाभ्यः प्राप्तानि उपाधिपत्राणि च दर्शयन्ति इति प्राप्ताः आरोपाः सन्ति। अतः द्विस्तरेण परीक्षणं कर्तुं निर्णयः कृतः। एषा नियुक्तिः ६२९७ पदानां निमित्तं क्रियते, यत्र अन्तिमनिर्णयः शिक्षाविभागेन क्रियते। राज्ये साक्षात्कारार्थं द्वि-विंशतिसहस्रातधिकाः आवेदनकर्तारः आगताः। चतुर्दशः निजीसंस्थाः साक्षात्कारं कुर्वन्ति। नियुक्तिपूर्वं ६२९७ पूर्वप्राथमिक- शिक्षकाणां नर्सरी- टीचर-ट्रेनिंग (NTT) उपाधिपरीक्षणं भविष्यति। कृत्रिम- उपाधिः सन्तीति सन्देहेन शिक्षानिदेशालयेन परीक्षणस्य निर्णयः कृतः। साक्षात्कारप्रक्रियायां कतिपयेषु जनपदेषु कृत्रिम- उपाधीनां प्राप्तिः इत्यनेन आरोपाः प्राप्ताः। अतः नियुक्तिपूर्वं परीक्षणं करणीयमिति निदेशः जनपदधिकृत्यः प्राप्तः। शिक्षानिदेशालयेन साक्षात्कारं कुर्वतीभ्यः निजी-संस्थाभ्यः सम्यक् परीक्षणं करणीयमिति निर्देशः कृतः। यदि कश्चन कृत्रिम-उपाधेः आधारेण नियुक्तः भवति, तर्हि ताम् संस्थां कृष्णसूच्यां स्थापयिष्यतीति स्पष्टीकरणं दत्तम्। विभागीय- अधिकारिणः अवदन् यत् नियुक्तिपूर्वं समस्तानां शैक्षिक-योग्यता, च NCTE मान्यताप्राप्त-उपाधीनां परीक्षणं करिष्यते। तदर्थं जनपदस्तरे शिक्षा- उपनिदेशकस्य अध्यक्षतायां समितयः निर्मास्यन्ते।पूर्वप्राथमिक- शिक्षकनियुक्तौ NCTE- मार्गदर्शिकाः मान्याः भविष्यन्ति। एनटीटी- उपाधिः द्विवर्षीयः च एनसीटीई मान्यसंस्थाभ्यः प्राप्तिः अनिवार्यः। नर्सरी- केजी-कक्षायाः शिक्षकाणां पदं "प्रारंभिक- शिशुसंवर्धन- शिक्षकः" इति नाम्ना निर्दिष्टम्। २१ वर्षात् ४५ वर्षपर्यन्तं, च दशमद्वादशकक्षायाम् ५०% अङ्कैः उत्तीर्णाः हिमाचलनिवासिनः पात्राः स्युः। विद्यालयवारं रिक्तस्थानानि विद्यालय- शिक्षानिदेशकः निर्धारणं करिष्यन्ति। करम् एवं सेवाप्रदाताशुल्कसहितं मासिकं १०००० रूप्यकाणां पारिश्रमिकं निश्चितम्, यत्र एजेंसी- शुल्कं, GST, अन्य-व्ययाः च समाविष्टाः।

# विद्यालयीयपाठ्यक्रमे समाविष्टः भविष्यति मादकद्रव्य- जागरूकतायाः विषये अध्यायः- मुख्यमंत्री सुक्खुः



**हिमसंस्कृतवार्ताः- शिमला।**
मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् राज्यसर्वकारः मादकद्रव्यस्य दुरुपयोगविषये जागरूकतां वर्धयितुं विद्यालयस्य पाठ्यक्रमे एकं अध्यायं समावेवेष्टुं गच्छति। अद्य अत्र मादकद्रव्यस्य दुरुपयोगस्य अवैधव्यापारविरुद्धस्य च अन्ताराष्ट्रीयदिवसस्य अवसरे आयोजितस्य समारोहस्य अध्यक्षतां कुर्वन् मुख्यमन्त्री समाजस्य प्रत्येकं वर्गं हिमाचलप्रदेशं मादकद्रव्यमुक्तं राज्यं कर्तुं मादकद्रव्यस्य दुरुपयोगविरुद्धस्य अभियानस्य भागः भवितुम् आग्रहं कृतवान्। सः अवदत् यत् अस्माकं युनः देशस्य भविष्यं सन्ति तथा च समृद्धस्य भारतस्य स्वप्नः तदा एव साकारः भवितुम् अर्हति यदा युनः स्वस्थाः, बलवन्तः, ऊर्जावन्तः च सन्ति। सः अवदत् यत् अस्माकं सर्वकारेण मादकद्रव्यस्य दुरुपयोगस्य व्यापारस्य च विरुद्धं शून्यसहिष्णुतानीतिः स्वीकृता, मादकद्रव्यव्यापारे सम्बद्धानां विरुद्धं च कठोरकार्याणि क्रियन्ते।
देवभूमौ मादकद्रव्याणां स्थानं नास्ति इति मुख्यमन्त्री अवदत्। सः युनाम् आह्वानं कृतवान् यत् ते स्वं मादकद्रव्याणां दूरं स्थापयन्तु, अपि च स्वमित्राणि अस्मिन् विनाशकारीमार्गे गन्तुं निवारयन्तु। सः अवदत् यत् राज्यसर्वकारः मादकद्रव्यव्यापारसम्बद्धं जालं मूलतः निष्कासयितुं निरन्तरं प्रयतते। मादकद्रव्यव्यसनात् स्वस्थतां प्राप्यमाणानां जनानां कृते जीविकां कौशलवर्धनं च प्रदातुं मुख्यधारायां सम्बद्धं क्रियते। एतदर्थं सिरमौरमण्डलस्य कोटला- बड़ोगे ५.३४ कोटिरूप्यकाणां व्ययेन १०० शय्यायुक्तं आधुनिकं व्यसननिवृत्तिकेन्द्रं स्थापितं भवति, यस्य निर्माणकार्यं प्रारब्धम् अस्ति। मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारस्य उद्देश्यं प्रत्येकस्मिन् मण्डले व्यसननिवृत्तिकेन्द्रस्थापनम् अस्ति। सः अवदत् यत् सत्तां स्वीकृत्य अस्माकं सर्वकारेण २०२३ तमे वर्षे PIT- & PS Act कार्यान्वितम्, यत् पूर्वभाजपासर्वकारः सम्पूर्णपञ्चवर्षेषु कार्यान्वितुं असमर्थः आसीत्। सुखविन्दरसिंहसुक्खुः उपस्थितान् जनान् मादकद्रव्याणां दुरुपयोगस्य विरुद्धं शपथग्रहणं कारयित्वा राज्ये मादकपदार्थनिवारणस्य प्रति उत्कृष्टं कार्यकर्तृभ्यः विभिन्नसंस्थाः जनान् च पुरस्कृतवान्।

# प्रवर्तननिदेशालयेन निशांतसरीनस्य सप्तस्थानेषु अन्वेषणं, ४०तः अधिकाः

## वित्तकोशसंख्याः, त्रयः तालकयुक्तकोशाः च ग्रहीताः, ३२ लक्षरूप्यकाणां वाहनानि ग्रहीतानि




हिमसंस्कृतवार्ताः- धर्मशाला। प्रवर्तननिदेशालयस्य (ईडी) चण्डीगढक्षेत्रेण हिमाचलस्य काङ्गड़ायां नियुक्तस्य सहायक- मादकद्रव्यनियंत्रकस्य निशांतसरीनस्य सप्त- आवासीय- व्यापारिकपरिसरस्य सर्वकारीय- कार्यालयस्य च हरियाणा- पञ्जाबप्रदेशयोः च स्थितानां तस्य परिवारस्य सदस्यानां सहकारिणां च 22-23 दिनाङ्के अन्वेषणं कृतम्। सहायकमादकद्रव्यनियन्त्रकबद्दीरूपेण पदस्थापितः सरीनः इत्यस्य व्यक्तिगतलाभार्थं आधिकारिकपदस्य दुरुपयोगः, भ्रष्टाचारः, उत्कोचः च इति विषये एतत् अन्वेषणं कृतम्। प्रवर्तननिदेशालयेन गुरुवासरे एषा सूचना दत्ता। ईडी इत्यस्य अन्वेषणकार्यक्रमे औषधानुज्ञापत्राणि, कारणप्रदर्शनसूचनाः, फार्माकम्पनीभ्यः निर्गतानि अनुमोदनानि, सम्पत्तिसम्बद्धाभिलेखाः, तदतिरिक्तं मोबाईलफोन, लैपटॉप, पेनड्राइव इत्यादीनि डिजिटलयन्त्राणि ग्रहीतानि। अन्वेषणकार्यक्रमे निशांतसरीनस्य तस्य परिवारस्य च सदस्यानां प्रायः ३२ लक्षरूप्यकाणां द्वे वाहने, ४० तः अधिकाः वित्तकोशसंख्याः/एफडीआर इति, त्रयः तालकयुक्तकोशाः च ग्रहीताः। तदतिरिक्तं ओमेक्स कैसिया न्यूचण्डीगढनगरे तस्य निवासस्थाने बिलरहितस्य ६० तः अधिकाः मद्यस्य कूप्यः अपि प्राप्ताः। तदतिरिक्तं एडीसी, धर्मशाला इत्यस्य वर्तमानभूमिकायां निशांतसरीनस्य बलात्धनग्रहणे, निशांतसरीनस्य परिवारस्य सदस्यानां औषधकम्पनीनां च मध्ये परस्परसम्बद्धानां वित्तीयव्यवहारस्य उपालम्भानाम् अपि अन्वेषणं क्रियते। ईडी इत्यस्य मते अस्मिन् प्रकरणे अन्वेषणं प्रचलति।

# शिक्षामन्त्रिणा रोहितठाकुरेण फतेहपुरविधानसभाक्षेत्रे प्रायः १० कोटिरूप्यकाणां महत्त्वपूर्णशैक्षिकपरियोजनानां शिलान्यासं कृतम्



हिमसंस्कृतवार्ताः। शिक्षामन्त्री रोहितठाकुरः गुरुवासरे फतेहपुरविधानसभाक्षेत्रे प्रायः १० कोटिरूप्यकाणां व्ययेन प्रस्तावितानां महत्त्वपूर्णशैक्षिकपरियोजनानां शिलान्यासं कृतवान्। एतेषु प्रथमचरणस्य मंझारे ५ कोटिरूप्यकाणां व्ययेन निर्मितं दिवसावासविद्यालयं, ५.६५ कोटिरूप्यकाणां व्ययेन वर्षायां सार्वजनिकपुस्तकालयः च अन्तर्भवति। अस्मिन्नावसरे फतेहपुरस्य विधायकः राज्ययोजनाबोर्डस्य उपाध्यक्षः भवानी सिंहपठानिया अपि उपस्थितः जातः। शिक्षामन्त्री रोहितठाकुरः अवदत् यत् राज्यसर्वकारः शिक्षां सर्वतोमुख्यविकासस्य मेरुदण्डं मन्यते तथा च मुख्यमन्त्री सुखविन्दरसिंहसुखोः नेतृत्वे प्रत्येकं छात्राय गुणवत्तापूर्णं, आधुनिकं, सुलभं च शिक्षां प्रदातुं सततं प्रयतते। सः अवदत् यत् निजी-सर्वकारीय -विद्यालययोः मध्ये अन्तरं पूरयितुं सर्वकारस्य मुख्यं उद्देश्यम् अस्ति। अस्मिन् दिशि प्रत्येकस्मिन् विधानसभाक्षेत्रे दिवसावासविद्यालयाः स्थापिताः सन्ति, यत्र छात्राणां कृते स्मार्टकक्षा, विज्ञान-सङ्गणक-प्रयोगशाला, क्रीडासुविधाः, पौष्टिकभोजनं च इत्यादीनि सर्वाणि आधुनिकसुविधानि प्राप्यन्ते ।. फतेहपुरस्य विधायकः भवानीसिंह पठानिया एताः परियोजनाः क्षेत्रस्य कृते ऐतिहासिकाः इति उक्त्वा उक्तवान् यत् एतेन न केवलं स्थानीयछात्राणां कृते उच्चगुणवत्तायुक्ता शिक्षा प्रदास्यति, अपितु एताः संस्थाः शिक्षायाः आदर्शप्रतिरूपरूपेण अपि स्थापिताः भविष्यन्ति। अस्मिन् अवसरे उपमण्डाधिकारी विश्रुत भारती, उपनिदेशकः उच्च शिक्षा विकाससमहाजनः, डीएसपी नूरपुरम् विशाल वर्मा, अधीक्षकः अभियंता जगतार सिंहः उपस्थिताः अभवन्।

# ईरानस्य विजयः अमेरिकायाः मुखोपरि प्रहारः, इजरायलयुद्धस्य समाप्तेः अनन्तरं प्रथमवारं खामेनेई



ईरानस्य सर्वोच्चनेता आयातल्लाह अली खामेनी गुरुवासरे प्रथमं सार्वजनिकवक्तव्यं दत्वा पुष्टिम् अकरोत् यत् स्वदेशः इजरायल्-देशं जित्वा अमेरिका-देशाय अपि समुचितं उत्तरं दत्तवान् इति। सः वस्तुतः अवदत् यत् इरान्-देशः अमेरिका-देशस्य मुखस्य उपरि प्रबलं प्रहारं दत्तवान् । अमेरिकादेशस्य मध्यस्थतायाः कारणात् मंगलवासरे प्रवर्तमानस्य युद्धविरामस्य घोषणायाः अनन्तरं खामेनी इत्यनेन एषा टिप्पणी कृता। एकस्मिन् चलचित्रसन्देशे खामेनी इत्यनेन उक्तं यत् इस्लामिकगणराज्यं विजयी अभवत्, प्रतिफलरूपेण अमेरिकादेशस्य मुखे चपेटिका मारितवान् । कतरदेशे अमेरिकीसैन्यकेन्द्रे ईरान् इत्यनेन क्षेपणास्त्रप्रहारः कृतः इति वार्ताणाम् अनन्तरं तस्य वक्तव्यं प्राप्तम्। परन्तु अस्मिन् आक्रमणे कस्यापि मृत्योः सूचना न प्राप्ता । खामेनेई अपि स्वस्य सम्बोधने अमेरिकादेशे तीक्ष्णं आक्रमणं कृतवान् । सः अवदत् यत् अमेरिकादेशः द्वयोः देशयोः मुक्तयुद्धे केवलं तस्मात् कारणात् हस्तक्षेपं कृतवान् यत् यदि सा हस्तक्षेपं न करोति तर्हि ज़ायोनिस्ट्-शासनस्य (इजरायलस्य) पूर्णतया विनाशः भविष्यति इति।

# भारतेन चीनदेशस्य छिंगदाओ नगरे शङ्घाई-सहयोग-सङ्गठनस्य रक्षामन्त्रिणाम् उपवेशने संयुक्त-घोषणापत्रे हस्ताक्षरं कर्तुं निराकृतम्



हिमसंस्कृतवार्ताः - भारतेन चीनदेशस्य छिंगदाओ नगरे शङ्घाई-सहयोग-सङ्गठनस्य रक्षामन्त्रिणाम् उपवेशने संयुक्त-घोषणापत्रे हस्ताक्षरं कर्तुं निराकृतम्। आधिकारिकसूत्रेण प्रतिपादितम् यत् भारतं संयुक्त-प्रतिवेदनस्य भाषायाः विषये सन्तुष्टः नैव अस्ति। अस्मिन् प्रतिवेदने पारसीम्नि क्षेत्रे आतङ्कवादीनां क्रियाकलापानाम् स्पष्ट-उल्लेखः नास्ति । रक्षामन्त्रिणः राजनाथसिंहस्य संयुक्तघोषणापत्रे साहमत्यं विनैव सम्मेलनमिदं संयुक्तविज्ञप्तौ समाप्तम्। एससीओ चार्टर इत्यस्यानुसारं संगठन-मतदानं विनैत्र साहमत्ये निर्णयं प्रतिपादयति। रक्षामन्त्री एससीओ-देशान् अवैधमानकानाम् अङ्गीकर्तुम् आग्रहं कृतवान्। सः अवदत् यत् केचन् देशाः पारसीम्नि आतङ्कवादं नीतिनां साधनरूपेण उपयोगं कुर्वन्ति तथा च आतङ्कवादिभ्यः आश्रयं यच्छन्ति। इतः पूर्व रक्षामन्त्री राजनाथसिंहः आतङ्कवादं चरमपंथवादं विरुध्य एकीकृतवैश्विक-कार्याचरणस्य आह्वानं कृतवान्। चीनदेशस्य छिंगदाओ नगरे शङ्घाईसहयोग-सङ्गठनम् इत्यस्य रक्षामन्त्रिणां उपवेशने सः अवदत् यत् शान्तिः समृद्धिः च आतङ्कवादेन सह नैव आगन्तुं शक्नोति। असौ अवदत् यत् भारतेन पारसीम्नि आतङ्कवादीनां संरचनां विध्वंसितुं सिन्दूराभियानेन आत्मरक्षणस्य अधिकारस्य उपयोगः कृतः। सः अवदत् यत् भारतेन प्रदर्शितं यत् आतङ्कवादस्य केन्द्रं सुरक्षितं नास्ति अपि च भारतं तानि स्थलानि आलक्ष्य भेदं अवश्यमेव करिष्यति। शङ्घाई-सहयोग-सङ्गठनम् एकोत्तरैकशत तमे वर्षे स्थापितं एकः अन्तः सर्वकारीय निकायः अस्ति। तत्र भारतं सप्तदशोत्तरैकशत तमे वर्षे पूर्णरूपेण सदस्यं सञ्जातम्।

# आपदलस्य वरिष्ठनेत्रोः ACB इत्यस्य जालः, 5590 कोटिरुप्यकाणाम् अस्ति भ्रष्टाचारारोपः

दिल्लीसर्वकारस्य भ्रष्टाचारविरोधी शाखायां आम आदमीपक्षस्य वरिष्ठनेतृद्वयस्य पूर्वस्वास्थ्यमन्त्रिणां च सौरभभारद्वाजस्य सत्येन्द्रजैनस्य च विरुद्धं बृहत् भ्रष्टाचारप्रकरणं पंजीकृतम्। आरोपः अस्ति यत् २०१८-१९ तमवर्षे दिल्लीसर्वकारेण अनुमोदितानां २४ स्वास्थ्यमूलसंरचनापरियोजनानां कृते कोटिरूप्यकाणि व्ययितानि, परन्तु तेषु कश्चन अपि परियोजना सम्पन्ना न अभवत्। आरोपः अस्ति यत् एतासु परियोजनासु ११ ग्रीनफील्ड् (नवभूमौ निर्माणम्) १३ ब्राउनफील्ड् (पुराणभवनानां विस्तारः) च अन्तर्भवति स्म ।

# महाकविकालिदासदिवसः- महाकवेः कालिदासस्य साहित्येन संस्कृतं विश्वे प्रतिष्ठिता- प्रो हरेकृष्ण अगस्ती




**हिमसंस्कृतवार्ताः - नागपुरम्।**

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य रामटेक मुख्यालये आषाढमासस्य प्रथमदिवसस्य अवसरे गुरुवासरे २६ जुलै २०२५ दिनाङ्के महाकविकालिदासदिवसः अतीव उत्साहेन आचरितः। विश्वविद्यालयस्य परिसरे कुलपतिः (प्रभारी) रामटेकपरिसरस्य च निदेशकः प्रो हरेकृष्णः अगस्ती महाकविकालिदासस्य पूर्णाकृतौ श पुष्पांजलिः अर्पिता। प्रो. हरेकृष्णः अगस्ती महाकवेः कालिदासस्य कविता मेघदूतस्य सौन्दर्ये बोधितवान्। प्रो. अगस्ती उक्तवान् यत् महाकवि कालिदासः विश्वविद्यालयस्य प्रेरणा अस्ति। सप्तकलाकृतीनां कारणात् सः न केवलं सम्पूर्णे विश्वे लोकप्रियः अस्ति, अपि तु विश्वसाहित्यस्य प्रेरणादायकः अपि अस्ति। कालिदासस्य साहित्येन वैश्विकस्तरस्य संस्कृतस्य प्रतिष्ठां दातुं कार्यं कृतम्। अस्माकं विश्वविद्यालयः कालिदाससाहित्यस्य प्रचारार्थं सर्वदा अग्रणीः अस्ति।

अत एव सप्तखण्डेषु कालिदाससाहित्यस्य मराठीभाषानुवादः, कालिदासस्य महाकाव्यस्य लघुचलच्चित्रं वा कालिदाससाहित्यमाश्रितानि व्याख्यानानि, संगोष्ठयः, सम्मेलनानि वा वयं निरन्तरं तानि आयोजयामः। महाकविकालिदासस्य नाम्ना स्थापितं अस्माकं विश्वविद्यालयः कालिदासस्य संस्कृतस्य च उत्थानार्थं प्रतिबद्धम् अस्ति। अद्य महाकविकालिदासदिवसस्य अवसरे संस्कृतभाषासाहित्यविभागेन "आषाढ़स्य प्रथमदिवसः" इति विषये विशेषव्याख्यानस्य आयोजनं कृतम्। अस्मिन् व्याख्याने संस्कृतभाषा-साहित्यविभागस्य प्रमुखः संस्कृतसाहित्यविशेषज्ञः प्रो. परागजोशी कालिदास- रामटेकयोः ऐतिहासिकसम्बन्धं प्रस्तुत्य कालिदासस्य मेघदूतस्य महाकाव्यस्य काव्यसौन्दर्यस्य विस्तरेण उक्तवान्। अभिनवभारती, वारंगा, रत्नगिरी उपकेन्द्रेषु अपि महाकविः कालिदासः अभिनन्दितः।

# महाकविकालिदासः

**उपमां उपमा नास्ति काव्यमनुपमं हि तत्।**
**उपमा कालिदासस्य तस्मादेव हि विश्रुतः।।**



कालिदासः संस्कृतसाहित्यस्य मनोरमणीयः अतीव सुन्दरः स्वप्न इव भासते। महाकवेः रचनाः साहित्यस्रजः कण्ठमणिरिव विराजन्ते। कालिदासस्य कालनिर्धारणे विद्वत्सु मतमतान्तराः। प्रथमक्रिस्ताब्दतः षष्ठीक्रिस्ताब्दपर्यन्तं तस्य स्थितिकालः विविधैः इतिहासकारैः कल्पितः। तस्य स्थानविषयेऽपि मतभेदाः वर्तन्ते। परं वेदशास्त्रपुराण-इतिहासभूगोलखगोलादिषु विषयेषु पारङ्गतस्य अस्य रससिद्धस्य कवेः रचनाः तु स्थलकालातीताः।

कविः सनातनवैदिकसंस्कृतेः पुरस्कर्ता। चतुर्वर्गपुरुषार्थाणां पाण्डित्यपूर्णविवेचनं कवेः रचनासु दरीदृश्यते। तस्य नायिकाः सर्वगुणसंपन्नाः, सौंदर्यावत्यः सन् मुग्धाः शालिनाश्च। प्रेमनि निमज्जन्त्यः अपि ताः मर्यादां नैव उल्लङ्घयन्ति। तस्य नायकाः अपि वीराः दाक्षिण्यपराः धर्मशीलाश्च। कवेः सर्वासु रचनासु भारतीयसंस्कृतेः मनोरमं शब्दचित्रं भावचित्रं च विद्यते। विविधैः भौगोलिकवैशिष्ट्यैः सौन्दर्येनालङ्कृतस्य भारतस्य रमणीयं दर्शनं वर्तते। कल्पनाचातुर्यं, पदमाधुर्यं, पात्रसंरचनानैपुण्यं, रसोल्लासः, ललितमनोहारिवचनानि आदिभिः गुणैः कवेः काव्यनाटकानि सर्वजनादरणीयानि। विदुषां कृते कालिदाससाहित्यं नाम शास्त्रदेशकालेतिहासभूगोलस्य अभ्याससाधनम्। कलारसिकानां कृते प्रसादगुणयुक्तं,माधुर्यपूर्णम्,अभिनवकल्पनायुतम्, अनुपमोपमाभिरलङ्कृतं श्रमपरिहारस्य मनोविनोदस्य च साधनमपि। तथापि न तत् साहित्यम् उच्छृङ्खलं परं तस्मिन् भारतीयसंस्कृतेः गभीरचिन्तनं विद्यते।

स महान् मनोचिकित्सकः। मनुजस्य मनोव्यापारं सम्यग्तया अजानीत। कस्मिन् प्रसङ्गे मनुष्यस्य मनः कथं प्रतिक्रियते इति ज्ञात्वा तस्य काव्यनाटकेषु पात्रनियोजनं, संवादाः ,प्रसङ्गाः च दृश्यन्ते। तस्मात् "मम कथा एव कथ्यते कविना।" एषा भावना रसिकमनसि दृढीभवति। कालिदासः प्रत्येकं मनुष्यस्य सखा। जर्मनकविः गेटेमहोदयः शाकुन्तलम् पठित्वा अनृत्यतिति सुविदितम्। तस्य रचनाः स्थलकालातीताः। उत्तमसाहित्यकारस्य एतदेव लक्षणम्। स्वदुःखं दूरीकर्तुं जनाः काव्यनाटकसाहित्यम् आस्वादयन्तीति कालिदासः सम्यक् जानाति स्म। अतः तस्य सर्वाः रचनाः सुखान्ताः। उपमालङ्कारस्य सौन्दर्यपूर्णः चमत्कृतिपूर्णः च प्रयोगः यथा कालिदासेन कृतः न तथा अन्यकविना।अत उपमा कालिदासस्य इति उक्तिः प्रसिद्धा। साहित्यं नाम अक्षरवाङ्गमयम्। कालिदासस्य एतादृशमक्षरवाङ्मयं यस्यां भाषायां विद्यते सा तु अक्षरभाषा एव।

**दीक्षितमानसी**

# कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालये राष्ट्रियकार्यशालायाः चतुर्थदिने मातृकाद्वयस्य अनुलेखनं कुलपतिभ्यः भव्यसमर्पणं च सुसम्पन्नम्



**हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः नलबारी, असमप्रदेशः।** कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन-विश्वविद्यालये २६/०६/२०२५ इत्यस्मिन् दिनाङ्के 'पाण्डुलिपिविज्ञानं प्रतिलेखनञ्च' इति विषयक-एकविंशतिदिनात्मका राष्ट्रीयकार्यशाला स्वीयं चतुर्थं दिवसं यशस्वितया सम्पाद्य अतीव सफलतां प्राप्तवती।


अस्मिन् दिवसे कार्यशालायाः चत्वारि सत्राणि सम्पन्नानि। त्रिषु सत्रेषु सुप्रसिद्धः पाण्डुलिपिशास्त्रविशारदः पण्डितः भवानन्दनाथ झा महोदयः शिक्षकत्वेन कार्यं कृतवान्। तेन सर्वे प्रतिभागिनः प्राचीनपाण्डुलिपीनां प्रतिलेखनस्य सूक्ष्माभ्यासः कारिताः। विशेषतः 'मेरुतन्त्रम्' इत्यस्य पाण्डुलिपेः प्रतिलेखनाभ्यासः प्रमुखरूपेण जातः। ततः परं 'अक्षरचूडामणिः', 'शब्दाभिधानम्' चेत्याख्यमात्रिकायाः अपि अनुलेखनकार्यं विनियोगपूर्वकं निष्पादितम्। अनुलेखनं सम्यग्रूपेण समर्पणीयं जातम्। इदम् अनुलेखनं विश्वविद्यालयस्य कुलपतिभ्यः आदरणीयः प्रो. प्रह्लाद रा. जोशीवर्येभ्यः समर्पितं जातम्, यत् कार्यशालायाः एकं विशेषम् आकर्षणम् अभवत्।

अन्तिमसत्रे पुनः पं. भवनाथ झा महोदयेन PowerPoint प्रस्तुतेन पाण्डुलिपिः कथं पठनीया?, त्रुटीनां निराकरणं कथं करणीयम्?, कानि कानि चिह्नानि भवन्ति? पुष्पिका कीदृशी भवति? कथं ततः कालः निर्धार्यते? लिपिकारस्य गुणविशेषाः के के? इत्यादिषु अतीव सारगर्भितं मार्गदर्शनं प्रदत्तम्। सर्वमिदं दिवसं कार्यशालायाः इतिहासे एकं महत्त्वपूर्णम् अध्यायं सञ्जातम्। प्रतिभागिनः अतीव हर्षिताः सन्तः पाण्डुलिपिविज्ञानस्य प्रयोगात्मकं प्रशिक्षणं प्राप्तवन्तः।

# माल चीन दा मत खरीदै

**पहाड़ी गल्लां**

माल चीन दा मत खरीदै सच्चा देश प्यारा ।
भारत कन्ने करै दुश्मणी चीन पड़ोसी म्हारा ।।
छुड्डा खेल खिलौणे इसदे फोन वी सारे छड्डा ।
जे खरीदण माल चीन दा नंगे करी ने कड्ढा ।।
मोस्ट फेवर्ड नेशन वाली नीत नी इसदी लग्गदी ।
पाकिस्तान दे हत्थां जद नैहर खून दी बग्गदी ।।
दहशत गर्दा भेजी जाहलू पाक आतंक मचांदा ।
चीन यू एन ओ अंदर जाई यार अड़ंगा लांदा ।।
दुनिया सारी इक्की पासें एह किल्हा वी धमकांदा ।
कोई मरै जे सैनिक म्हारा बैठी खुसी मनांदा ।।
इस नी मनणा सिधे हत्थें ओंगल टेढी करनी ।
कड़े फैसले लैणे मितरो ईंहयां गल्ल नी सरनी ।।
जेहड़े गुपचुप मिलदे जाई इन्हां जो कुण समझायै ।
मैं तां बोलां मितरो इन्हां जा कोई वोट न पायै ।।



**हिमसंस्कृतवार्ताः , शक्तिचन्दराणा, पपरोला**